श्रीमुकुन्दाष्टकम्

बलभिदुपलकान्तिद्रोहिणि श्रीमदङ्गे
घुसृणरसविलासैः सुष्ठु गान्धर्विकायाः।
स्वमदननृपशोभां वर्धयन्देहराज्ये
प्रणयतु मम नेत्राभीष्टसिद्धिं मुकुन्दः॥१॥

उदितविधुपरार्धज्योतिरुल्लङ्घिवक्त्रो
नवतरुणिमरज्यद्बाल्यशेषातिरम्यः।
परिषदि ललितालीं दोलयन्कुण्डलाभ्यां
प्रणयतु मम नेत्राभीष्टसिद्धिं मुकुन्दः॥२॥

कनकनिवहशोभानन्दि पीतं नितम्बे
तदुपरि नवरक्तं वस्त्रमित्थं दधानः।
प्रियमिव किल वर्णं रागयुक्तं प्रियायाः
प्रणयतु मम नेत्राभीष्टपूर्तिं मुकुन्दः॥३॥

सुरभिकुसुमवृन्दैर्वासिताम्भःसमृद्धे
प्रियसरसि निदाघे सायमालीपरीताम्।
मदनजनकसेकैः खेलयन्नेव राधां
प्रणयतु मम नेत्राभीष्टसिद्धिं मुकुन्दः॥४॥

परमलमिह लब्ध्वा हन्त गान्धर्विकायाः
पुलकिततनुरुच्चैरुन्मदस्तत्क्षणेन।
निखिलविपिनदेशान्वासितानेव जिघ्रन्
प्रणयतु मम नेत्राभीष्टसिद्धिं मुकुन्दः॥५॥

प्रणिहितभुजदण्डः स्कन्धदेशे वराङ्ग्याः
स्मितविकसितगण्डे कीर्तिदाकन्यकायाः।
मनसिजजनिसौख्यं चुम्बनेनैव तन्वन्
प्रणयतु मम नेत्राभीष्टसिद्धिं मुकुन्दः॥६॥

प्रमददनुजगोष्ठ्याः कोपि संवर्तवह्निर्
व्रजभुवि किल पित्रोर्मूर्तिमान्स्नेहपुञ्जः।
प्रथमरसमहेन्द्रः श्यामलो राधिकायाः
प्रणयतु मम नेत्राभीष्टसिद्धिं मुकुन्दः॥७॥

स्वकदनकथयाङ्गीकृत्य मृद्वीं विशाखां
कृतचटु ललितां तु प्रार्थन्प्रौढशीलाम्।
प्रणयविधुरराधामानविध्वंसनाय
प्रणयतु मम नेत्राभीष्टसिद्धिं मुकुन्दः॥८॥

परिपठति मुकुन्दस्याष्टकं काकुभिर्यः
सकलविषयसङ्गात्संनियम्येन्द्रियाणि।
व्रजनवयुवराजो दर्शयन्स्वं सराधे
स्वजनगणनमध्ये तं प्रियायास्तनोति॥९॥

इति श्रीरूपगोस्वामिविरचितस्तवमालायां श्रीमुकुन्दाष्टकं समाप्तम्